कुल प्रश्नों की संख्या : 19 | कुल पृष्ठों की संख्या : 08

Total No. of Questions: 19 | Total No. of Pages: 08

हाई स्कूल परीक्षा, दिसम्बर–2021

512

विषय : संस्कृत (सामान्यम्)

Subject: SANSKRIT (General)

समय : 03 घण्टे | पूर्णांक : 100

Time: 03 Hours | Maximum Marks: 100

निर्देशा :–

(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

प्र.1 उचित विकल्पं चित्वा लिखत – **(5×1=5)**

(क) 'महा+ईशः' इत्यस्य पदे सन्धिः अस्ति –

(अ) महिशः (ब) महैशः

(स) महेशः (द) महीशः

(ख) 'सदाचारः' इत्यस्मिन् पदे सन्धिः अस्ति –

(अ) गुणसन्धिः (ब) व्यंजनसन्धिः

(स) दीर्घसन्धिः (द) विसर्गसन्धिः

(ग) 'परोपकारः' इत्यस्य सन्धिः विच्छेदः अस्ति –

(अ) परोप + कारः (ब) परो + पकारः

(स) पर + उपकारः (द) पर + अपकारः

(घ) विसर्ग सन्धेः उदाहरणम् अस्ति –

(अ) गायकः (ब) तथैव

(स) इत्यादि (द) नमस्ते

(ङ) अधोलिखितेषु अव्ययं अस्ति –

(अ) अस्ति (ब) पठति

(स) कुत्र (द) गच्छति

schools.aglasem.com
aglasem.com

प्र.2 उचित विकल्पं चित्वा लिखत – (5×1=5)

(क) द्वन्दसमासस्य उदाहरणमस्ति –

(अ) पितरौ (ब) पीताम्बरः

(स) दशाननः (द) प्रतिदिनम्

(ख) 'प्रतिदिनम्' इत्यस्मिन् पदे समासः अस्ति –

(अ) द्वन्द समासः (ब) अव्ययीभाव समासः

(स) द्विगु समासः (द) तत्पुरुष समासः

(ग) 'विद्यालय' इत्यस्मिन् पदे समासः विग्रहः अस्ति –

(अ) विद्या आलयः (ब) वि द्यालयः

(स) विद्यां आलयः (द) विद्यायाः आलयः

(घ) 'अनुगमनम्' इत्यस्मिन् पदे उपसर्गः अस्ति –

(अ) गम् (ब) अनु

(स) नम् (द) अनुगम्

(ङ) अधोलिखितेषु उपसर्गः अस्ति–

(अ) ल्यप् (ब) क्त्वा

(स) सु (द) तुमुन्

प्र.3 उचित विकल्पं चित्वा लिखत – (5×1=5)

(क) "पठिष्यति" इत्यस्मिन् पदे लकारः अस्ति –

(अ) लोट्लकारः (ब) लङ्लकारः

(स) लृट्लकारः (द) लट्लकारः

(ख) "भवति" इत्यस्मिन् पदे वचनम् अस्ति –

(अ) द्विवचनम् (ब) एकवचनम्

(स) बहुवचनम् (द) अन्यवचनम्

(ग) "लिख" इत्यस्मिन् पदे पुरुषः अस्ति –

(अ) प्रथमपुरुषः (ब) महापुरुषः

(स) मध्यमपुरुषः (द) उत्तमपुरुषः

(घ) "सेवते" इत्यस्मिन् पदे धातुः अस्ति –

(अ) सेवत (ब) सेवत्

(स) सेब (द) सेव्

(ङ) "कोलाहलं मा कुरुत" अस्मिन् वाक्ये अव्ययम् अस्ति –

(अ) मा (ब) कुरुत

(स) कोलाहलं (द) कोला

schools.aglasem.com
aglasem.com

प्र.4 उचित विकल्पं चित्वा लिखत – **(5×1=5)**

(क) "पठितव्यम्" इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) शतृ (ब) शानच्

(स) अनीयर् (द) तव्यत्

(ख) "क्त" प्रत्यय उदाहरणम् अस्ति –

(अ) गतः (ब) कम्पमानः

(स) हसन् (द) पठन्

(ग) "ल्यप्" प्रत्ययस्य उदाहरणम् अस्ति –

(अ) नीत्वा (ब) दत्वा

(स) कृतवान् (द) आदाय

(घ) "नारी" इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) ङीन् (ब) त्रल्

(स) त्व (द) मतुप्

(ङ) परोपदेशवेलायां..........................सर्वे भवन्ति वै।

(अ) अशिष्टा (ब) शिष्टाः

(स) सम्वेदनशीलाः (द) मार्मिकाः

प्र.5 प्रदत्तैः शब्दैः रिक्त स्थानपूर्ति कुरुत – **(5×1=5)**

(भूतानि, वचो, अनिलं, सूर्यदेवः, यशः)

(क) वायुः....................................ददाति।

(ख) ....प्रकाशं प्रयच्छति।

(ग) महर्षिः........................शरीरेण अमरः अस्ति।

(घ) दानेन..वशी भवन्ति।

(ङ) मितं च सारं च...................................हि वाग्मिता।

schools.aglasem.com
aglasem.com

प्र.6 अधोलिखितेषु प्रश्नेषु त्रयाणां उत्तराणि संस्कृत भाषायाम् एक वाक्येन लिखत – (3×2=6)

(क) सन्तः कानि घ्नन्ति?

(ख) ब्राह्मणपरिवारः केन समासादितः?

(ग) देवालये किं प्रचलति स्म?

(घ) अस्माकं सर्वेषां जननी का?

(ङ) ऊर्जितं यशः कैः अर्जितम्?

प्र.7 अधोलिखितेषु द्वयोः शब्दयोः शब्दरूपाणि त्रिषु वचनेषु लिखत – (2×1=2)

(क) रमा – सप्तमी विभक्तिः

(ख) पिता – प्रथमा विभक्तिः

(ग) राम – पञ्चमी विभक्तिः

प्र.8 "मयि" अथवा "तस्य" इति पदस्य विभक्तिं वचनं च लिखत। (2)

प्र.9 अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत – (2×5=10)

(क) पुरा भारतवर्षे कपिलवस्तु नाम्नि नगरे शुद्धोदनो नाम राजा अभवत्। तस्य पुत्रः सिद्धार्थः आसीत्। अयं गौतम इति वंशनाम्ना ख्यातः आसीत्। सिद्धार्थः सांसारिक भोगानां नश्वरतां प्राणिनां कष्टानि च अवलोक्य राज्यभोगात् विरक्तः जातः। अयमेव सिद्धार्थः अनन्तरं गौतमबुद्धः इति नाम्ना प्रसिद्धः अभवत्।

(1) कपिलवस्तु नाम्नि नगरे कः राजा अभवत्?

(2) शुद्धोदनस्य पुत्रः कः आसीत्?

(3) सिद्धार्थः केषां कष्टानि अवलोक्य विरक्तः जातः?

(4) सिद्धार्थस्य अपर नाम किंमासीत्?

(5) "अवलोक्य" इत्यस्मिन् पदे कः प्रत्ययः?

schools.aglasem.com
aglasem.com

(ख) बहुभाग्योदयेन एव मानवजीवनं प्राप्यते। एतज्जीवनं देवानां कृते अपि दुर्लभं वर्तते। जीवनस्य उन्नत्यै आलस्यं विहाय अहर्निशम् उत्तमानि कार्याणि करणीयानि यतोहि विगतः समयः पुनर्नागच्छति।

(1) मानजीवनं कथं प्राप्यते?

(2) मानव जीवनं केषां कृते दुर्लभम्?

(3) आलस्यं विहाय कानि करणीयानि?

(4) कः पुनर्नागच्छति?

(5) "बहुभाग्योदयेन" इत्यस्मिन् पदे कः सन्धिः?

(ग) सूर्यवंशस्य राजा सागरः आसीत्। सः एकदा अश्वमेधयांग कृतवान्। यागस्य अन्ते यागस्य अश्वः यत्रतत्र सञ्चारं कृतवान्। अश्वमेधं कृत्वा सगरः स्वयम् इन्द्रः भविष्यति इति देवेन्द्रस्य असूया आसीत्। तस्मात् सः यागस्य विघ्नं कर्तुं मार्ग चिन्तितवान्। ततः अश्वं गृहीत्वा पाताललोके कपिलमुनेः पुरतः स्थापितवान्। तदा मुनिः तपः कुर्वन् ध्याने आसीत्।

(1) सूर्यवंशस्य राजा कः आसीत्?

(2) सागरस्य अन्ते यागस्य अश्वः किं कृतवान्?

(3) अश्वमेधं कृत्वा कः स्वयम् इन्द्रः भविष्यति?

(4) अश्वं गृहीत्वा पाताल लोके कस्मिन् पुरतः स्थापितवान्?

(5) "ध्याने" इत्यस्मिन् पदे का विभक्ति?

schools.aglasem.com
aglasem.com

प्र.10 अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत – (2×5=10)

(क) केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः,
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते,
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।।

(1) चन्द्रोज्ज्वलाः हारा कं न विभूषयन्ति?

(2) वाण्येका पुरुषं किं करोति?

(3) कानि खलु क्षीयन्ते?

(4) सततं भूषणं किम्?

(5) "सततं" इति शब्दस्य समानार्थीपदं लिखत।

(ख) वहन्ति वर्षन्ति नदन्ति भान्ति, ध्यायन्ति, नृत्यन्ति समाश्वसन्ति।
नद्यो घना मत्तगजाः वनान्ताः प्रियाविहीनाः शिखिनः प्लवङ्गमाः।।

(1) काः वहन्ति?

(2) के वर्षन्ति?

(3) मत्तगजाः किं कुर्वन्ति?

(4) के नृत्यन्ति?

(5) "नृत्यन्ति" इति शब्दस्य लकारः, पुरुषः, वचनञ्च लिखत।

(ग) मत्ता गजेन्द्रा मुदिता गवेन्द्रा, वनेषु विक्रान्ततरा मृगेन्द्राः।
रम्या नगेन्द्रा निभृता नरेन्द्राः, प्रक्रीडितो वारिधरैः सुरेन्द्रः।।

(1) के कुत्र विक्रान्ततराः?

(2) के मुदिताः?

(3) सुरेन्द्रः कैः प्रक्रीडितः?

(4) के रम्याः?

(5) वनेषु इत्यस्य पदस्य विभक्तिं वचनं च लिखत।

schools.aglasem.com
aglasem.com

प्र.11 युग्ममेलनं कुरुत– (कोऽपि चत्वारः) (4×1=4)

	(अ)		(आ)
(क)	छात्रसालस्य मातुर्नाम	–	उदयगिरिगुहाः
(ख)	छत्रसालस्य राजधानी	–	शालभञ्जिका
(ग)	भेलसा	–	सारन्धादेवी
(घ)	आदिकविना	–	वाल्मीकिना
(ङ)	स्वर्णयुगस्य	–	पन्नानगरम्

प्र.12 शुद्ध वाक्यानां समक्षम् "आम्" अशुद्धवाक्यानां समक्षम् "न" इति लिखत – (4×1=4)

(1) धीर पुरुषाणां प्रजा आपदि स्फुरति।

(2) यत् महाभारते अस्ति तदन्यत्र नास्ति।

(3) महर्षेः ख्यातिः सर्वत्र व्याप्ता अस्ति।

(4) सूर्यदेवः वृष्टिं वर्षति।

प्र.13 अधोलिखितेषु प्रश्नेषु चतृर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायां एकपदेन लिखत – (4×1=4)

(क) भारतीयैकता साधकं किम्?

(ख) भारतस्य पुरातनः सखा कः विद्यते?

(ग) यशोधरा कस्य पत्नी आसीत्?

(घ) ग्रामे कः वृक्षः आसीत्?

(ङ) महर्षिः कस्य स्थापनां कृतवान्?

प्र.14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् सुभाषितद्वयं लिखत। (4)

प्र.15 स्वस्य प्राचार्यस्य कृते छात्रवृत्यर्थम् आवेदनमपत्रम् लिखत। (4)

अथवा

स्वप्राचार्यस्य कृते एकम् अवकाशार्थं प्रार्थनापत्रम् लिखत।

प्र.16 अधोलिखितेषु पञ्च अशुद्धकारक वाक्यानां शुद्धिः करणीया – (5)

(1) बालकः विद्यालस्य प्रति गच्छति।

(2) राधा मन्दिरं गच्छन्ति।

(3) महेशः जलं पिबसि।

(4) ईश्वरं नमः।

(5) वृक्षं पत्रं पतति।

(6) अहम् आगच्छति।

schools.aglasem.com
aglasem.com

प्र.17 अधोलिखित वाक्यानां कथानुसारेण क्रम–संयोजनं कुरुत – **(5)**

(क) अयं स्वामिपूर्णानन्दसरस्वतीसकाशात् संत्यासम् अगृह्णात्।

(ख) एकस्मिन् दिनं मूलशङ्करः स्वगृहम् अत्यजत्।

(ग) अस्य जन्मनाम मूलशङ्करः आसीत्।

(घ) महर्षे दयानन्दस्य जन्म गुर्जरप्रदेशे ब्राह्मणपरिवारे अभवत्।

(ङ) अयं "कथमहम् अमरो भवेयम्" इति चिन्तयामास।

प्र.18 अधोलिखितम् अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखित – **(5)**

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। जन्मभूमिः स्वर्गात् उत्कृष्टतरा अस्ति। सा लोकानां शरणदायिनी, विविधखाद्यपदार्थ – प्रदायिनी, सर्वव्यवहाराणां लीलाभूमिः च अस्ति। वैदिकः ऋषिः कथयति– माता भूमिः पुत्रोऽहं पृथिव्याः। वयं राष्ट्रभाषां, राष्ट्रीयचरित्रं, त्यागभावनां विना राष्ट्रस्य संरक्षणं कर्तुं न पारयामः। परस्परैक्य भावनां विना राष्ट्रं कदापि समृद्धं न भवति।

(क) जन्मभूमिः कस्मात् गरीयसी?

(ख) जन्मभूमिः स्वर्गात् कथं अस्ति?

(ग) "माताभूमिः" इति कः कथयति?

(घ) कीदृशी भावां विना राष्ट्रं कदापि समृद्धं न भवति?

(ङ) "कर्तुं" इत्यस्मिन् पदे कः प्रत्ययः?

प्र.19 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबंधं लिखत – **(10)**

(1) दीपावलिः

(2) सदाचारः

(3) अनुशासनम्

(4) मम दिनचर्या

----

schools.aglasem.com
aglasem.com

कुल पृष्ठों की संख्या : 04

हाई स्कूल परीक्षा, दिसम्बर–2021

आदर्श उत्तर

512

विषय : संस्कृत (सामान्य)

Subject: SANSKRIT (General)

उ.1	(क)	(स)	महेशः	(5X1=5)
	(ख)	(ब)	व्यञ्जन संधिः	
	(ग)	(स)	पर + उपकारः	
	(घ)	(द)	नमस्ते	
	(ङ)	(स)	कुत्र	
उ.2	(क)	(अ)	पितरौ	(5X1=5)
	(ख)	(ब)	अव्ययी भाव समासः	
	(ग)	(द)	विद्यायाः आलयः	
	(घ)	(ब)	अनु	
	(ङ)	(स)	सु	
उ.3	(क)	(स)	लट्लकारः	(5X1=5)
	(ख)	(ब)	एकवचनम्	
	(ग)	(स)	मध्यम पुरूषः	
	(घ)	(द)	सेव्	
	(ङ)	(अ)	मा	
उ.4	(क)	(द)	तव्यत्	(5X1=5)
	(ख)	(अ)	गतः	
	(ग)	(द)	आदाय	
	(घ)	(अ)	ङीन्	
	(ङ)	(ब)	शिष्टाः	
उ.5	(क)	अनिलं		(5X1=5)
	(ख)	सूर्यदेवः		
	(ग)	यशः		
	(घ)	भूतानि		
	(ङ)	वचो		

schools.aglasem.com
aglasem.com

उ.6 (क) सन्तः पापं तापं दैन्यं च घ्नन्ति। (3×2=6)

(ख) ब्राह्मण परिवारः घटोत्कचेन समासादितः।

(ग) देवालये प्रसादत्तेन भोजन वितरणं प्रचलति स्म।

(घ) अस्मांक सर्वेषां जननी भारतमाता।

(ङ) ऊर्जितं यशः पूर्वपुरूषैः अर्जितम्

उ.7 (क) रमायां रमयोः रमासु (2)

(ख) पिता पितरौ पितरः

(ग) रामात् रामाभ्याम् रामेभ्यः

उ.8 मयि – सप्तमी विभक्तिः एकवचनम् (2)

तस्य – षष्ठी विभक्तिः एकवचनम्

उ.9 (क) (1) कपिल वस्तुनाम्नि नगरे शुद्धोदनो नाम राजा अभवत्। (2×5=10)

(2) शुद्धोदनस्य पुत्रः सिद्धार्थः आसीत्।

(3) सिद्धार्थः प्राणिनां कष्टानि अवलोक्यं विरक्तः जातः।

(4) सिद्धार्थस्य अपर नाम गौतम बुद्धः।

(5) ल्यप् प्रत्ययः

(ख) (1) मानवजीवनं बहुभाग्योदयेन प्राप्यते।

(2) मानवजीवनं देवानां कृते दुर्लभम्।

(3) आलस्यं विहाय उत्तमानि कार्याणि करणीयानि।

(4) विगतः समयः पुनर्नागच्छति।

(5) गुण संधिः

(ग) (1) सूर्यवंशस्य राजा सगरः आसीत्।

(2) यागस्य अन्ते यागस्य अश्व यत्र तत्र सञ्चारं कृतवान्।

(3) अश्वमेधं कृत्वा सगरः स्वयम् इन्द्रः भविष्यति।

(4) अश्वं गृहीत्वा पाताल लोके कपिलमुनेः पुरतः स्थापितवान्।

(5) सप्तमी विभक्तिः

schools.aglasem.com
aglasem.com

उ.10 (क) (1) चन्द्रोज्ज्वलाः हारा पुरुषं न विभूषयन्ति। (2×5=10)

(2) वाण्येका पुरुषं समलङ्करोति।

(3) भूषणानि खलु क्षीयन्ते।

(4) सततं वाग्भूषणं भूषणम्।

(5) ''नित्यम्''

(ख) (1) नद्यो वहन्ति।

(2) घनाः वर्षन्ति।

(3) मत्तगजाः नदन्ति।

(4) शिखिनः नृत्यन्ति।

(5) लट्लकारः, प्रथमपुरूषः, एकवचनञ्च।

(ग) (1) मृगेन्द्राः वनेषु विक्रान्ततराः

(2) गवेन्द्राः मुदिताः।

(3) सुरेन्द्र वारिधरैः प्रक्रीडितः।

(4) नगेन्द्रः रम्याः।

(5) सप्तमी विभक्तिः बहुवचनम्।

उ.11 (4×1=4)

	'अ'		'आ'
(क)	छत्रसालस्य मातुर्नाम	–	सारन्धादेवी
(ख)	छत्रसालस्य राजधानी	–	पन्नानगरम्
(ग)	भेलसा	–	उदयगिरिगुहाः
(घ)	आदिकविना	–	वाल्मीकिना
(ङ)	स्वर्णयुगस्य	–	शालभञ्जिका

उ.12 (4×1=4)

(1) आम्

(2) न

(3) आम्

(4) न

उ.13 (4×1=4)

(क) संस्कृतम्

(ख) हिमालयः

(ग) सिद्धार्थस्य

(घ) न्यग्रोधवृक्षः

(ङ) आर्यसमाजस्य

उ.14 सुभाषितद्वयं (4)

schools.aglasem.com
aglasem.com

उ.15 पत्रे संकेतं, सम्बोधनं, दिनाङ्कं, भाषादिकं शुद्धपत्रस्य कृते चत्वारः अङ्काः प्रदानीयाः। **(4)**

उ.16 (1) बालकः विद्यालयं प्रति गच्छति। **(5×1=5)**

(2) राधा मन्दिरं गच्छति।

(3) महेशः जलं पिबति।

(4) ईश्वराय नमः

(5) वृक्षात् पत्रं पतति।

(6) अहम् आगच्छमि।

उ.17 (1) (घ) महषै दयानन्दस्य जन्म गुर्जर प्रदेशे ब्राह्मण परिवारे अभवत्। **(5×1=5)**

(2) (ग) अस्य जन्मनाम मूलशङ्कर आसीत्।

(3) (ङ) अयं ''कथमहम् अमरो भवेयम्'' इति चिन्तयामास।

(4) (ख) एकस्मिन् दिनं मूलशङ्कर स्वगृहम् अत्यजत्।

(5) (क) अयं स्वामिपूर्णानन्द सरस्वती सकाशात् संन्यासम् अगृह्णात्।

उ.18 (क) जन्मभूमिः स्वर्गादपि गरीयसी। **(5)**

(ख) जन्मभूमिः स्वर्गात् उत्कृष्टतरा अस्ति।

(ग) "माताभूमिः" इति वैदिकः ऋषिः कथयति।

(घ) राष्ट्रभाषां विना राष्ट्रं कदापि समृद्धं न भवति।

(ङ) तुमुन प्रत्ययः

उ.19 निबन्धे विषयवस्तु वाक्य रचना भाषादि कं शुद्ध निबंधस्य कृते दशङ्काः प्रदानीयाः। **(10)**

----

schools.aglasem.com

aglasem.com

कुल प्रश्नों की संख्या : 22	कुल पृष्ठों की संख्या : 08
Total No. of Questions: 22	Total No. of Pages: 08

हायर सेकेण्डरी परीक्षा, दिसम्बर–2021

053

विषय : संस्कृत (सामान्य)

Subject: SANSKRIT (General)

समय : 03 घण्टे	पूर्णांक : 100
Time: 03 Hours	Maximum Marks: 100

निर्देश :–

(i) *सर्वे प्रश्नाः अनिवार्याः सन्ति।*

(ii) *प्रश्नानाम् अङ्काः तेषां सम्मुखे लिखिताः सन्ति।*

प्र.1 अधोलिखितेषु उचित विकल्पं चित्वा लिखत – (5×1=5)

(क) "महाराजः" पदे समासः अस्ति –

(अ) द्वन्द समासः (ब) तत्पुरुष समासः

(स) द्विगु समासः (द) बहुव्रीहि समासः

(ख) अधोलिखितेषु द्विगु समासः अस्ति –

(अ) दशाननः (ब) नवरात्रि

(स) पीताम्बरः (द) पितरौ

(ग) "रामलक्ष्मणौ" इत्यस्मिन् पदे समास विग्रहः अस्ति –

(अ) राम लक्ष्मण च (ब) राम लक्ष्मणौ च

(स) राम च लक्ष्मणः (द) रामः च लक्ष्मणः च

(घ) "पञ्चानां वटानां समाहारः" इत्यस्य सामासिकपदं भवति –

(अ) पञ्चवट (ब) वञ्चवटाः

(स) पञ्चवटी (द) वटानाम्

(ङ) "जगदीशः" पदे सन्धिः अस्ति –

(अ) व्यञ्जनसन्धिः (ब) दीर्घसन्धिः

(स) विसर्गसन्धिः (द) स्वरसन्धिः

schools.aglasem.com
aglasem.com

प्र.2 उचित विकल्पं चित्वा लिखत – (5×1=5)

(क) अधोलिखितेषु अव्ययम् अस्ति –

(अ) गच्छति (ब) सर्वत्र
(स) पठन् (द) लभ्

(ख) अधोलिखितेषु उपसर्गः नास्ति –

(अ) प्र (ब) अत्र
(स) परा (द) सु

(ग) "भाषा लावण्यमयी सरलता च अस्ति" इत्यस्मिन् वाक्ये अव्ययम् अस्ति –

(अ) भाषा (ब) सरलता
(स) च (द) अस्ति

(घ) अधोलिखितेषु अव्ययं नास्ति –

(अ) अत्र (ब) तत्र
(स) अस्ति (द) तथा

(ङ) "तथापि" पदस्य सन्धि विच्छेदः अस्ति –

(अ) तथा + पि (ब) तथा + अपि
(स) त + थापि (द) तथ + अपि

प्र.3 उचित विकल्पं चित्वा लिखत – (5×1=5)

(क) अधोलिखितेषु क्त्वा प्रत्ययः अस्ति –

(अ) कृतवान् (ब) कर्तुं
(स) कृत्वा (द) कुर्तन्

(ख) "बालिका" इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) टाप् (ब) ङीन्
(स) ङीप् (द) ङीष्

(ग) शतृ प्रत्ययस्य उदाहरणम् अस्ति –

(अ) पठित्वा (ब) पठितुम्
(स) पठितव्यम् (द) पठन्

(घ) "सेवमानः" पदे प्रत्ययः अस्ति –

(अ) शानच् (ब) तुमुन्
(स) क्त (द) क्तवतु

(ड़) "मनोहरः" इत्यस्मिन् पदे सन्धिः अस्ति –

(अ) व्यञ्जनसन्धिः (ब) विसर्गसन्धिः
(स) दीर्घसन्धिः (द) हल्सन्धिः

schools.aglasem.com
aglasem.com

प्र.4 उचित विकल्पं चित्वा लिखत – (5×1=5)

(क) "कुर्वः" इत्यस्मिन् पदे वचनम् अस्ति –

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम् (द) अन्यवचनम्

(ख) "भव" इत्यस्मिन् पदे पुरुषः अस्ति –

(अ) प्रथमपुरुषः (ब) मध्यमपुरुषः

(स) उत्तमपुरुषः (द) महापुरुषः

(ग) "विस्मरिष्यसि" इत्यत्र लकारः अस्ति –

(अ) लट्लकारः (ब) लोट्लकारः

(स) लङ्लकारः (द) लृट्लकारः

(घ) ....चक्षुर्मनुष्याणाम्।

(अ) चक्षुः (ब) मनुष्यः

(स) ज्ञानं (द) हिरण्यं

(ङ) पण्डितोऽपि वरं शत्रुर्न मुखौ.................................।

(अ) हितकारकः (ब) अहितकारकः

(स) न मूर्खः (द) वरं

प्र.5 उचित विकल्पं चित्वा लिखत – (5×1=5)

(क) "गङ्गा" इत्यस्य पदस्य पर्यायः अस्ति –

(अ) कावेरी (ब) झेलम्

(स) नर्मदा (द) भागीरथी

(ख) "सज्जनैः" इत्यस्य विलोमपदः अस्ति –

(अ) दुर्जनैः (ब) सत्पुरुषैः

(स) सन्तैः (द) पण्डितैः

(ग) "मूर्खः" इत्यस्य विलोम शब्दः अस्ति –

(अ) मन्दबुद्धिः (ब) वैशाखनन्दनः

(स) पण्डितः (द) बुद्धिहीनः

(घ) "नमः" योगे विभक्तिः भवति –

(अ) प्रथमा (ब) द्वितीया

(स) तृतीया (द) चतुर्थी

(ङ) "कामात्" इत्यत्र विभक्ति अस्ति –

(अ) पञ्चमी (ब) षष्ठी

(स) तृतीया (द) द्वितीया

schools.aglasem.com
aglasem.com

प्र.6 अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायां एकवाक्येन देयानि– (3×2=6)

(1) धन लक्ष्मीः कथं राजते?

(2) बोधिसन्त्वः कथं सारथिः बभूव?

(3) मनस्वी कार्यार्थी किं न गणयति?

(4) भरतः किमर्थं मूर्च्छितं भवति?

प्र.7 भर्तृहरिः कतेः रचनाद्वयं लिखत। (2)

अथवा

महाकविः कालिदासस्य महाकाव्यद्वयं लिखत।

प्र.8 महाभारतस्य रचनाकारः कः? अस्मिन् महाकाव्ये कति श्लोकाः सन्ति? (2)

अथवा

वेदाः कति सन्ति? तेषां नामानि लिखत।

प्र.9 युग्ममेलनं कुरुत – (केचित् द्वे) (2)

	(अ)		(ब)
(क)	भारती	–	शिशुपालवधम्
(ख)	बाणभट्टः	–	किरातार्जुनीयम्
(ग)	माघः	–	कादम्बरी

प्र.10 रामायणे कति काण्डाः सन्ति? रचनाकारः कः? (2)

अथवा

वेदाङ्गानि कति सन्ति? तेषां नामानि लिखत।

प्र.11 अधोलिखितेषु त्रयाणां अशुद्धकारक वाक्यानां शुद्धिः करणीया – (3×1=3)

(1) दीने प्रति दयां कुरु।

(2) नगरस्य बहिः वनम् अस्ति।

(3) शिक्षकस्य सह छात्राः गच्छन्ति।

(4) भिक्षुकं भिक्षां ददातु।

प्र.12 अधोलिखितेषु शब्देषु त्रयाणां शब्दानां रूपाणि निर्देशानुसारं लिखत – (3)

(क) पूर्व (पुल्लिङ्ग) तृतीया विभक्ति – द्विवचनम्

(ख) किम् (स्त्रीलिङ्ग) द्वितीया विभक्ति – बहुवचनम्

(ग) जन्मन् (नपुंसकलिङ्ग) पञ्चमी विभक्ति – एकवचनम्

(घ) विद्वस् प्रथमा विभक्ति – एकवचनम्

schools.aglasem.com
aglasem.com

प्र.13 युग्ममेलनम् – (4×1=4)

	(अ)		(ब)
(क)	वसन्ते लसन्तीह	–	नदीभिव
(ख)	क्षीणतोयम्	–	प्रमार्ष्टुम्
(ग)	देवादास्यन्ते	–	सरसा रसालाः
(घ)	धैर्यगुण	–	यज्ञभाविता

प्र.14 अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायां एकपदेन लिखत – (4×1=4)

(क) महोअर्णः का?

(ख) महाराजः कस्य पादयोः अपतत्?

(ग) अभिज्ञानशाकुन्तलं कस्य रचना?

(घ) नित्यं यज्ञे किं प्रतिष्ठितम्?

(ङ) सलिलस्य सौन्दर्यं कीदृशमस्ति?

प्र.15 प्रदत्तैः शब्दैः अनुच्छेद लेखनं कुरुत – (4)

(भाषाऽस्ति, एषा, व्याकरणादिदोषरहिता, भारतस्य, संस्कृतभाषा, कथनेन, भारतीयभाषाणां, महदादरो)

संस्कृतं न केवलं भारतवर्षस्य..अपितु सा..................गौरवं स्वाभिमानञ्च अस्ति।...............................वैज्ञानिकी सुव्यवस्था....................अनुपमेया च भाषा अस्ति। सङ्गणकयन्त्राय अपि.......................अत्युत्तमा इति वैज्ञानिकानां मतम्। "संस्कृतिः संस्कृताश्रितेति" ....संस्कृतस्य महत्त्वम् सिद्धम्।...........................जननीयमित्यपि वक्तुं शक्यते। सम्पूर्णे संसारे संस्कृतस्य कृते.........................विद्यते।

अथवा

(तपस्वी, भ्रमति, परिभ्रमन, शुकः, ऋषिः, अगच्छत्, लोककल्याणार्थम्, गृहे)

कश्चित् महान्.........................ऋषिः आसीत्। सः........................अहर्निशं भूतले..............................स्म। एकदा स.................................एकं ग्रामम् अगच्छत्। ग्रामस्य एकस्मिन् गृहे एकः...................... पालितः आसीत्। सः शुकः ऋषिं दृष्ट्वा मारयतु कुट्टयतु इति वारं वारं उच्चैः उक्तवान्। अनन्तरं स...............................अपरं स्थानं........................तत्रापि एकस्मिन्....................शुकः पालितः आसीत्।

schools.aglasem.com
aglasem.com

प्र.16 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् सुभाषितद्वयं लिखत – (4)

प्र.17 प्रदत्तैः शब्दैः रिक्तस्थानपूर्ति कुरुत – (चत्वारी) (4)

(सानन्दम्, सुधासौन्दर्यं, द्विनालीकगुलिकासारे, विध्वसं, सृष्टे)

(क) ....ते सलिलमशिवं न शमयतु।

(ख) अकस्मादेव..........................वृक्षो विदीर्यते।

(ग) साम्प्रतं.....................................प्राणांस्त्यक्ष्यामि।

(घ) पर्यावरण संरक्षणेव.........................संरक्षणम्।

(ङ) धूमोऽपि.....................................विदधाति।

प्र.18 अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि लिखत् – (2×4=8)

(अ) अस्माकं परितः स्थितानि जड़–चेतन तत्वानि चराचराः सर्वेऽपि पर्यावरणे अन्तर्भवति। सन्तुलितं पर्यावरणंसमग्रं जीवजातमुपकरोति। सरितः, पर्वताः, वनानि, प्रकृतौ स्थितानि सर्वाणि अपि पर्यावरणम् इत्युच्यते। पर्यावरणस्य रक्षणेन एव मानवस्य विकासो जायते।

(क) सन्तुलितं पर्यावरणं किं करोति?

(ख) के पर्यावरणम् इत्युच्यते?

(ग) पर्यावरणस्य रक्षणेन कस्य विकासो जायते?

(घ) "सर्वेऽपि" अत्र कः सन्धि?

(ख) तात! अवकाशदिनानि भवता सह आनन्देन यापनीयानि इति चिन्तयन्ती आगता अहम्। "परन्तु भवान् गृहे एव न भवति" इति वदन्ती स्पन्दना तदा एव गृहम् आगतस्य पितुः अङ्के उपविष्टवती। आतपे आगतः इत्यतः वैद्यस्य अजयस्य मुखं कृष्णवर्णायते।

(क) कानि भवता सह आनन्देन यापनीयानि?

(ख) "भवान् गृहे एव न भवति" इति कः उक्तवती?

(ग) स्पन्दना कस्य अङ्के उपविष्टवती?

(घ) कस्य मुखं कृष्णवर्णायते?

(स) बोधिसत्त्वः किल परमनिपुणमतिर्नौ सारथिर्बभूव। धर्मता ह्येषा बोधिसत्त्वानां प्रकृतिः यं यं शास्त्रातिशयमेते जिज्ञासन्ते कलाविशेषं वा तस्मिंस्तस्मिन्नधिकतरा भवन्ति मेधाविनो जगतः। तस्य सुपारग इति नाम बभूव।

(क) कः परमनिपुणमतिर्नौ सारथिर्बभूव?

(ख) धर्मता ह्येषा केषां प्रकृतिः?

(ग) बोधिसत्त्वस्य कः इति नाम बभूव?

(घ) "ह्येषां" अत्र कः सन्धिः?

schools.aglasem.com
aglasem.com

प्र.19 अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि लिखत् – (2×4=8)

(अ) मानं हित्वा प्रियोभवित, क्रोधं हित्वा न शोचति।

कामं हित्वाऽर्थवान् भवति, लोभं हित्वा सुखी भवेत्।।

(क) किं हित्वा प्रियो भवति?

(ख) क्रोधं हित्वा किं?

(ग) अर्थवान् कथं भवति?

(घ) "हित्वा" अत्र कः प्रत्ययः?

(ब) निनादय नवीनामये वाणि! वीणाम्।

मृदुंगाय गीतिं ललित–नीति–लीनाम्।।

(क) वाणीं कां वादयितुं प्रार्थयति?

(ख) गीतिं कथं गातुं कथयति?

(ग) कविः कां सम्बोधयति?

(घ) "वीणां" अत्र का विभक्ति?

(स) महो अर्णः सरस्वती प्रचेतयति केतुना।

धियो विश्वा विराजति।।

(क) महो अर्णः का?

(ख) सरस्वती केतुना किं करोति?

(ग) का धियो विश्वा विराजति?

(घ) "बुद्धि" इत्यस्य पदस्य पर्याय पदं लिखत।

प्र.20 स्वस्य प्राचार्यस्य कृते विद्यालय शुल्कमुक्त्यर्थम् एकं प्रार्थनापत्रम् लिखत। (4)

अथवा

पितरं कृते पत्रं लिखत।

schools.aglasem.com

aglasem.com

प्र.21 अधोलिखित अपठित गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – **(5)**

कुटिलाः जनाः स्वभावेन परेषाम् अहितम् इच्छन्ति। तेषां शक्तिः परेषां पीडनाय, बुद्धिः च परेषां वञ्चनाय भवति। तेषां मनसि अन्यत्, वचसि अन्यत्, कर्मणि च अन्यत् भवति। शान्ति वचनानि तान् सन्मार्गे आनेतुं न प्रभवन्ति। शुनः पुच्छः प्रयत्नेनापि कुटिलतां न त्यजति। दुग्धं पीत्वा अपि सर्पाः विषं न त्यजन्ति। कुटिलाः कुटिलतया एव सन्मार्गम् आश्रयन्ति।

(क) के कुटिलतया एव सन्मार्गम् आश्रयन्ति?

(ख) कुटिलानां शक्तिः किमर्थं भवति?

(ग) कीदृशानि वचनानि कुटिलान् सन्मार्गे आनेतुं न प्रभवन्ति?

(घ) के दुग्धं पीत्वा अपि विषं न त्यजन्ति?

(ङ) "हितम्" इत्यस्य पदस्य विपर्ययरूपे कः शब्दः अनुच्छेदे प्रयुक्तः?

प्र.22 अधोलिखितेषु एकस्मिन् विषये शत् शब्देषु संस्कृतभाषायां निबन्धं लिखत – **(10)**

(1) कालिदासः

(2) छात्रजीवनम्

(3) परोपकारः

(4) संस्कृतभाषायाः महत्त्वम्

----

schools.aglasem.com

aglasem.com

कुल पृष्ठों की संख्या : 04

हायर सेकेण्डरी परीक्षा, दिसम्बर–2021

आदर्श उत्तर

053

विषय : संस्कृत (सामान्य)

Subject: SANSKRIT (General)

उ.1 (5×1=5)

(क) (द) बहुब्रीहि समासः

(ख) (ब) नवरात्रि

(ग) (द) रामः च लक्ष्मण च

(घ) (स) पञ्चवटी

(ङ) (अ) व्यञ्जन सन्धि

उ.2 (5×1=5)

(क) (द) सर्वत्र

(ख) (ब) अत्र

(ग) (द) च

(घ) (स) अस्ति

(ङ) (अ) तथा + अपि

उ.3 (5×1=5)

(क) (द) कृत्वा

(ख) (ब) टाप्

(ग) (द) पठन्

(घ) (स) शानच्

(ङ) (अ) विसर्ग सन्धि

उ.4 (5×1=5)

(क) (द) द्विवचनम्

(ख) (ब) मध्यम पुरुषः

(ग) (द) लृटलकारः

(घ) (स) ज्ञानं

(ङ) (अ) हितकारकः

schools.aglasem.com
aglasem.com

उ.5 (5×1=5)

(क) (द) भागीरथी
(ख) (ब) दुर्जनैः
(ग) (द) पण्डितः
(घ) (स) चतुर्थी
(ङ) (अ) पञ्चमी

उ.6 (3×2=6)

(क) धनलक्ष्मीः सत्यस्य आश्रयं स्वीकृत्य राजते।
(ख) बोधिसत्त्वः परमनिपुणमतिना सारथिर्बभूव।
(ग) मनस्वी कार्यार्थी दुःखं–सुखं च न गणयति।
(घ) भरतः पितुः प्रतिमां दृष्ट्वा मूर्च्छितं भवति।

उ.7 (1) श्रृङ्गार शतकम् (2) नीतिशतकम् (3) वैराग्य शतकम् (2)

अथवा

उ.7 (1) कुमारसम्भवम् (2) रघुवंशम्

उ.8 महाभारतस्य रचनाकारः महर्षि वेदव्यासः, लक्षाधिक श्लाकाः सन्ति। (2)

अथवा

उ.8 वेदाः चत्वारः सन्ति। ऋग्वेद–यजुर्वेद–सामवेद–अथ्रवेदाश्च।

उ.9 (2)

(अ)	(ब)
भारवीः	किरातार्जुनीयम्
बाणभट्टः	कादम्बरी
माघ	शिशुपालवधम्

उ.10 रामायणे सप्त काण्डाः सन्ति, रचनाकारः महर्षि वाल्मीकिः। (2)

अथवा

उ.10 वेदाङ्गानि षड् सन्ति। शिक्षा, कल्पं, निरुक्तं, छन्दः, ज्योतिषं, व्याकरणम् इति

उ.11 (3×1=3)

(1) दीनं प्रति दयां कुरु।
(2) नगरात् बहिः वनम् अस्ति।
(3) शिक्षकैः सह छात्राः गच्छन्ति
(4) भिक्षुकाय भिक्षां ददातु।

उ.12 (3)

(क) पूर्वाभ्यामः
(ख) काः
(ग) जन्मनः
(घ) विद्वान्

schools.aglasem.com
aglasem.com

उ.13 युग्ममेलनम् – (4×1=4)

(अ)	(ब)
वसन्ते लसन्तीह	सरसा रसालाः
क्षीणतोयम्	नदीमिव
देवादास्यन्ते	यज्ञभाविता
धैर्यगुण	प्रमार्ष्टुम्

उ.14 (4×1=4)

(क) सरस्वती

(ख) सत्यस्य

(ग) कालिदासः

(घ) कर्म

(ङ) सुधा इव

उ.15 (1) भाषाऽस्ति (2) भारतस्य (3) संस्कृतभाषा (4) व्याकरणादि दोषरहिता (4)

(5) एषा (6) कथनेन (7) भारतीय भाषाणां (8) महदादरो

अथवा

उ.15 (1) तपस्वी (2) लोककल्याणार्थं (3) भ्रमति (4) परिभ्रमन

(5) शुषुः (6) ऋषि (7) अगच्छत् (8) गृहे

उ.16 सुभाषित द्वयम् – (2×2=4)

उ.17 (1) सुधा सौन्दर्यं (4)

(2) द्विनालीक गुलिकासारे

(3) सानन्दम्

(4) सृष्टेः

(5) विध्वंसं

उ.18 (2×4=8)

(अ) (क) संतुलितं पर्यावरणं समग्रं जीव जातमुपकरोति।

(ख) सरितः पर्वताः, वनानि, प्रकृतो स्थितानि सर्वाणि अपि पर्यावरणम् इत्युच्यते।

(ग) पर्यावरणस्य रक्षणेन मानवस्य विकासो जायते।

(घ) पूर्व रूप सन्धिः।

(ब) (क) अवकाशदिनानि भवता सह आनन्देन यापनीयानि।

(ख) "भवान् गृहे एव न भवति" इति स्पन्दना उक्तवती।

(ग) स्पन्दना पितुः अङ्के उपविष्टवती।

(घ) वैधस्य अजयस्य मुखं कृष्णवर्णायते।

schools.aglasem.com
aglasem.com

(स) (क) वोधिसत्वः परमनिपुणमतिर्नौ सारथिर्बभूव।

(ख) धर्मता ह्येषा बोधिसत्त्वानां प्रकृतिः।

(ग) बोधिसत्त्वस्य सुपारग इति नाम बभूव।

(घ) यण् सन्धिः।

उ.19 (2×4=8)

(अ) (क) मानं हित्वा प्रियो भवति।

(ख) क्रोधं हित्वा न शोचति।

(ग) अर्थवान् कामं हित्वा।

(घ) क्त्वा प्रत्ययः।

(ब) (क) वाणी वीणां वादयितुं प्रार्थयति।

(ख) गीतिं मृदुं गातुं कथयति।

(ग) कविः वाणीं (सरस्वतीं) सम्बोधयति।

(घ) द्वितीया विभक्तिः।

(स) (क) महो अर्णः सरस्वती।

(ख) सरस्वती केतुना प्रचेतयति।

(ग) सरस्वती धियो विश्वा विरजति।

(घ) धियः / धियों

उ.20 पत्रे संकेतं, सम्बोधनं, दिनांङ्क, भाषादिकं शुद्ध– (4)

पत्रस्य कृते चत्वारः अङ्काः प्रदानीयाः।

उ.21 (5)

(क) कुटिलाः कुटिलतया एव सन्मार्गम् आश्रयन्ति।

(ख) कुटिलानां शक्तिः परेषां पीऽनाय भवति।

(ग) शान्ति वचनानि कुदिलान् सन्र्मो आनेतुं न प्रभवन्ति।

(घ) सर्पाः दुग्धं पीत्वा अपि विषं न व्यजन्ति

(ड़) अहितम्

उ.22 निबन्धे विषयवस्तु, वाक्यरचना, भाषादिकं शुद्ध – (10)

निबन्धस्य कृते दशअङ्काः प्रदानीयाः।

———————————

schools.aglasem.com
aglasem.com